॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ५५

सचन्द्रकुमुदं रम्यं सार्ककारण्डवं शुभम् ।
तिष्यश्रवणकदम्बमभ्रशैवलशाद्वलम् ॥ १॥

पुनर्वसु महामीनं लोहिताङ्गमहाग्रहम् ।
ऐरावतमहाद्वीपं स्वातीहंसविलोडितम् ॥ २॥

वातसङ्घातजातोर्मिं चन्द्रांशुशिशिराम्बुमत् ।
भुजङ्गयक्षगन्धर्वप्रबुद्धकमलोत्पलम् ॥ ३॥

ग्रसमान इवाकाशं ताराधिपमिवालिखन् ।
हरन्निव सनक्षत्रं गगनं सार्कमण्डलम् ॥ ४॥

मारुतस्यालयं श्रीमान्कपिर्व्योमचरो महान् ।
हनूमान्मेघजालानि विकर्षन्निव गच्छति ॥ ५॥

पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च ।
हरितारुणवर्णानि महाभ्राणि चकाशिरे ॥ ६॥

प्रविशन्नभ्रजालानि निष्क्रमंश्च पुनः पुनः ।
प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ७॥

नदन्नादेन महता मेघस्वनमहास्वनः ।
आजगाम महातेजाः पुनर्मध्येन सागरम् ॥ ८॥

पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान् ।
ज्यामुक्त इव नाराचो महावेगोऽभ्युपागतः ॥ ९॥

स किं चिदनुसम्प्राप्तः समालोक्य महागिरिम् ।
महेन्द्रमेघसङ्काशं ननाद हरिपुङ्गवः ॥ १०॥

निशम्य नदतो नादं वानरास्ते समन्ततः ।
बभूवुरुत्सुकाः सर्वे सुहृद्दर्शनकाङ्क्षिणः ॥ ११॥

जाम्बवान्स हरिश्रेष्ठः प्रीतिसंहृष्टमानसः ।
उपामन्त्र्य हरीन्सर्वानिदं वचनमब्रवीत् ॥ १२॥

सर्वथा कृतकार्योऽसौ हनूमान्नात्र संशयः ।
न ह्यस्याकृतकार्यस्य नाद एवंविधो भवेत् ॥ १३॥

तस्या बाहूरुवेगं च निनादं च महात्मनः ।
निशम्य हरयो हृष्टाः समुत्पेतुस्ततस्ततः ॥ १४॥

ते नगाग्रान्नगाग्राणि शिखराच्छिखराणि च ।
प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः ॥ १५॥

ते प्रीताः पादपाग्रेषु गृह्य शाखाः सुपुष्पिताः ।
वासांसीव प्रकाशानि समाविध्यन्त वानराः ॥ १६॥

तमभ्रघनसङ्काशमापतन्तं महाकपिम् ।
दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस्तदा ॥ १७॥

ततस्तु वेगवांस्तस्य गिरेर्गिरिनिभः कपिः ।
निपपात महेन्द्रस्य शिखरे पादपाकुले ॥ १८॥

ततस्ते प्रीतमनसः सर्वे वानरपुङ्गवाः ।
हनूमन्तं महात्मानं परिवार्योपतस्थिरे ॥ १९॥

परिवार्य च ते सर्वे परां प्रीतिमुपागताः ।
प्रहृष्टवदनाः सर्वे तमरोगमुपागतम् ॥ २०॥

उपायनानि चादाय मूलानि च फलानि च ।
प्रत्यर्चयन्हरिश्रेष्ठं हरयो मारुतात्मजम् ॥ २१॥

विनेदुर्मुदिताः के चिच्चक्रुः किल किलां तथा ।
हृष्टाः पादपशाखाश्च आनिन्युर्वानरर्षभाः ॥ २२॥

हनूमांस्तु गुरून्वृद्धाञ्जाम्बवत्प्रमुखांस्तदा ।
कुमारमङ्गदं चैव सोऽवन्दत महाकपिः ॥ २३॥

स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः ।
दृष्टा देवीति विक्रान्तः सङ्क्षेपेण न्यवेदयत् ॥ २४॥

निषसाद च हस्तेन गृहीत्वा वालिनः सुतम् ।
रमणीये वनोद्देशे महेन्द्रस्य गिरेस्तदा ॥ २५॥

हनूमानब्रवीद्धृष्टस्तदा तान्वानरर्षभान् ।

अशोकवनिकासंस्था दृष्टा सा जनकात्मजा ॥ २६ ॥

रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता ।
एकवेणीधरा बाला रामदर्शनलालसा ।
उपवासपरिश्रान्ता मलिना जटिला कृशा ॥ २७ ॥

ततो दृष्टेति वचनं महार्थममृतोपमम् ।
निशम्य मारुतेः सर्वे मुदिता वानरा भवन् ॥ २८ ॥

क्ष्वेडन्त्यन्ये नदन्त्यन्ये गर्जन्त्यन्ये महाबलाः ।
चक्रुः किल किलामन्ये प्रतिगर्जन्ति चापरे ॥ २९ ॥

के चिदुच्छ्रितलाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः ।
अञ्चितायतदीर्घाणि लाङ्गूलानि प्रविव्यधुः ॥ ३० ॥

अपरे तु हनूमन्तं वानरा वारणोपमम् ।
आप्लुत्य गिरिशृङ्गेभ्यः संस्पृशन्ति स्म हर्षिताः ॥ ३१ ॥

उक्तवाक्यं हनूमन्तमङ्गदस्तु तदाब्रवीत् ।
सर्वेषां हरिवीराणां मध्ये वाचमनुत्तमाम् ॥ ३२ ॥

सत्त्वे वीर्ये न ते कश्चित्समो वानरविद्यते ।
यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः ॥ ३३ ॥

दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी ।
दिष्ट्या त्यक्ष्यति काकुत्स्थः शोकं सीता वियोगजम् ॥ ३४ ॥

ततोऽङ्गदं हनूमन्तं जाम्बवन्तं च वानराः ।
परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः ॥ ३५ ॥

श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः ।
दर्शनं चापि लङ्कायाः सीताया रावणस्य च ।
तस्थुः प्राञ्जलयः सर्वे हनूमद्वदनोन्मुखाः ॥ ३६ ॥

तस्थौ तत्राङ्गदः श्रीमान्वानरैर्बहुभिर्वृतः ।
उपास्यमानो विबुधैर्दिवि देवपतिर्यथा ॥ ३७ ॥

हनूमता कीर्तिमता यशस्विना
तथाङ्गदेनाङ्गदबद्धबाहुना ।
मुदा तदाध्यासितमुन्नतं महन्
महीधराग्रं ज्वलितं श्रियाभवत् ॥ ३८ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com